# संस्कृत-वार्ता:

दिनाङ्क :- 21.03.2024

प्रात: - 06:55

## प्रधानमन्त्री-स्टार्टअप महाकुम्भ

प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् भारतदेश: सपाद-लक्षाधिकैकं स्टार्टअप-उद्योगै: दशाधिकैकशतं च यूनिकॉर्न इत्येतै: सह विश्वस्य तृतीय-बृहत्तम-इको-प्रणालीत्वेन सम्मुखी-आगत:। ह्य: नवदिल्या: भारतमण्डपमस्थाने स्टार्टअप-महाकुम्भ इत्यमुं कार्यक्रमं सम्बोधयन् प्रधानमन्त्री उक्वान् यत् भारतस्य स्टार्टअप-परिस्थितिक-तन्त्रं देशस्य युवशक्ते: नवीन-भावस्य समर्थनेन अद्वितीय-गत्या पुष्पितं पल्लवितं च भवति।

प्रधानमन्त्री पुन: कथितवान् यत् अद्य यदा देशोऽयं सप्तचत्वारिंशदधिक द्विसहस्रं यावत् विकसितभारतस्य रूपरेखार्थं कार्यं निष्पादयन् अस्ति तदा एष: स्टार्टअप-महाकुम्भ: महत्वपूर्णं वर्तते। दशाधिकवर्षेषु भारतदेशेन आईटी-साफ्टवेयर-क्षेत्रयो: प्रगति: समाकलिता सम्प्रति च जना: भारते नवाचार-स्टार्टअप-इत्यनयो: संस्कृते: प्रवृत्तिं अवलोकयन्ति।

अन्तरिक्ष-स्टार्टअप-विषये सविस्तारं कथयन् प्रधानमन्त्री प्रोक्तवान् यत् अन्तरिक्ष-क्षेत्रे पञ्चाशदधिकेषु क्षेत्रेषु कार्यं कुर्वन्ति। येषु अन्तरिक्ष-यानस्य प्रक्षेपणमपि समाविष्टमस्ति। तेन समुदीरितं यत् यू.पी.आई. इति फिनटेक-स्टार्टअप-उद्योगाय समर्थनरूपेण उपस्थितो वर्तते। यत् देशे आंककीय-सेवानां विस्तारणाय नवीनोत्पादानां सेवानां विकासस्य च नेतृत्वं विदधाति।

## प्रधानमन्त्री/भूटान-यात्रा-स्थगनम्

प्रधानमन्त्रिणः नरेन्द्रमोदिनः अद्यारभ्य भूटानदेशस्य द्विदिवसीय-राजकीय-यात्रा विमानस्थानके प्रतिकूल ऋतोः कारणात् स्थगितम्। विदेशमन्त्रालयेन उक्तं यत् उभयोः पक्षयोः राजनयिकानां माध्यमेन नूतनाः तिथयः सुनिश्चिताः भविष्यन्ति।

## लोकसभा

निर्वाचनायोगेन लोकसभा-निर्वाचनात् पूर्वं प्रथमचरणीय मतदानाय ह्य: अधिसूचना एका प्रख्यापिता। एतस्मिन् प्रथमे चरणे सप्तदशराज्येषु चतुर्षु केन्द्र-शासित-प्रदेशेषु च द्वयधिकैकशतं लोकसभासनेभ्य: मतदानं भविष्यति। प्रथमे चरणेऽस्मिन् राजस्थानस्य द्वादश आसनेषु निर्वाचनं कारयिष्यते। एतस्मिन् श्रीगंगानगर-जयपुर-चुरू-जयपुरग्रामीण-भरतपुर-दौसा-करौली-धौलपुर-लोकसभा-सनानि सम्मिलितानि सन्ति।

लोकसभा-निर्वाचनानाम् अधिसूचनायाः प्रसारणेन सह असमराज्ये प्रथमचरणीय मतदानाय नामांकन-पत्रपूरणप्रक्रिया समारब्धा जाता। असमराज्ये परिसीमन-प्रकियानन्तरं प्रथमवारं निर्वाचनं भवति। एतस्मिन् चरणे अनेकेषां वरिष्ठनेतृणां नियतिनिर्धारणं भविष्यति। ध्यातव्यं वर्तते यत् तमिलनाडोः नवत्रिंशत्-आसनेषु, राजस्थानस्य द्वादश, उत्तरप्रदेशस्य अष्ट, मध्यप्रदेशस्य षड्, उत्तराखण्डस्य पञ्च, असम-महाराष्ट्रयोः पञ्च, बिहार राजस्य चतुर्षु, पश्चिमबंगालस्य च त्रिषु आसनेषु मतदानं भविष्यति। एतस्मिन् प्रथमे चरणे अरुणाचलप्रदेश-मणिपुर-मेघालय-राज्येषु द्वयोः आसनयोः छत्तीसगढ-मिजोरम-नागालैण्ड-सिक्किम-त्रिपुरा-अण्डमाननिकोबार-द्वीप-जम्मूकश्मीर-लक्षद्वीप-पुड्डुचेरी राज्येषु एकस्मिन् आसने मतदानं भविष्यति। अस्य मासस्य सप्तविंशतिदिनांकं यावत् नामांकन-प्रपत्रं पूरयितुं शक्यते। तत्रैव बिहारराज्याय नामांकनप्रक्रियायाः अन्तिमा तिथिः अष्टाविंशतिः दिनांकं भवति। नामांकनप्रक्रियायाः निरीक्षणं अस्य मासस्य अष्टविंश्यां तिथौ करिष्यते। तत्रैव बिहारराज्ये प्रक्रिया-निरीक्षणं त्रिंशद्दिनांके भविष्यति। नामप्रत्यावर्तनस्य अन्तिमदिनं अप्रैलमासस्य द्वितीयदिनमस्ति। मतदानं अप्रैलमासस्य नवदश दिनांके भविष्यति।

## भारत/ युद्धटैंक

सार्वजनिकक्षेत्रस्य बीईएमएल इत्यनेन देशस्य मुख्ययुद्धटैंक इत्यस्य कृते विकसित भारतस्य प्रथमं स्वदेशीयस्य पञ्चदशशतं यावत् अश्वशक्तियुतस्य इंजनेत्यस्य परीक्षणं ह्यः कर्णाटकस्य मैसूरुप्रभागे कृतम्। बीईएमएल इत्यनेन स्वीय अभूतपूर्वपरियोजनायाः अंतर्गतं देशे मुख्ययुद्धटैंक इत्यस्य कृते पञ्चदशशतं अश्वशक्तियुतस्य इन्जनेत्यस्य परिकल्पनं विकासं च कुर्वन् अस्ति। एतत् भारतस्य रक्षाक्षमतायां नवयुगं सूचयति यत् भारतस्य अभियांत्रिकी पराक्रमं रक्षाप्रौद्योगिक्यां आत्मनिर्भरतां प्रतिबद्धतां च प्रदर्शयति।

## आयरलैण्ड्-प्रधानमन्त्री त्यागपत्रम् :

आयरलैण्ड्-देशस्य प्रधानमन्त्रिणा लियो-वराडकर इत्यनेन सत्तारूढस्य फिने गेल् इति दलस्य नेतुः पदात् स्वत्यागपत्रं प्रदत्तम्। प्रधानमन्त्रिणा उक्तं यत्, उत्तराधिकारिणः चयनानन्तरं सः प्रधानमन्त्रिणः पदम् अपि त्यक्ष्यति। सः अवदत्, पदत्यागस्य कारणानि व्यक्तिगत-राजनैतिकं च सन्ति।

।। इति वार्ताः ।।